# वेद मन्त्राः

# *Veda Mantras*

DEVANĀGARĪ & RCCS

Vol. 3

www.saiveda.net
www.vedavishwa.com

# Ā Nō Bhadrāḥa

[RV S 1-89 *& SYVM 25-14 ; SYVK 27-18* (Kāñchī Pāṭhaḥa)]

ॐ आ नो᳚ भ॒द्राः क्रत॑वो यन्तु वि॒श्वतोऽद॑ब्धासो॒ , अप॑रीतास , उ॒द्भिद॑ः ।
दे॒वा नो॒ यथा॒ सद॒मिद्वृ॒धे , अस॒न्नप्रा᳚युवो रक्षि॒तारो᳚ दि॒वेदि॑वे ॥ १ ॥

ॐ ā nōō bhad’rā[hk]’ krata-vō yan’tu viśh’vatō
(a)dab’dhāsō , apa-rītāsa , ud’bhida-ḥa ।
dēvā nō yathā sadamid’vṛdhē ,
asan’nap’rāāyuvō rak’ṣhitārōō divēdi-vē ॥ 1 ॥

दे॒वानां᳚ भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒तां दे॒वानां᳚ रा॒तिर॒भि नो॒ नि व॑र्तताम् ।
दे॒वानां᳚ स॒ख्यमुप॑ सेदिमा व॒यं दे॒वा न॒ , आयु॒ः प्र ति॑रन्तु जी॒वसे᳚ ॥ २ ॥

dēvānāām’ bhad’rā su-matir’ṛ-jūyatān’
dēvānāām’ rātirabhi nō ni var’tatām ।
dēvānāām’ sakh’yamupa- sēdimā vayan’ dēvā na ,
āyu[fp]’ pra ti-ran’tu jīvasēē ॥ 2 ॥

तान्पूर्व॑या नि॒विदा᳚ हूमहे व॒यं भगं᳚ मि॒त्रमदि॑तिं॒ दक्ष॑म॒स्त्रिधम्᳚ ।
अ॒र्य॒मणं॒ वरु॑णं॒ सोम॑म॒श्विना॒ सर॑स्वती नः सु॒भगा॒ मय॑स्करत् ॥ ३ ॥

tān’pūr’va-yā nividāā hūmahē vayam’ bhagam’m’
mit’ramadi-tin’ dak’ṣha-mas’ridham’m ।
ar’yamaṇaṁ’ varu-ṇaṁ’ sōma-maśh’vinā saras’vatī
nas’ subhagā mayas’karate ॥ 3 ॥

तन्नो॒ वातो᳚ मयो॒भु वा᳚तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः ।

tan’nō vātōō mayōbhu vāātu bhēṣhajan’
tan’mātā pṛ-thivī tat’pitād’ dyau-ḥu ।

तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या यु॒वम् ॥४॥

tad’grāvāāṇas’ sōmasutōō mayōbhuvas’tadaśh’vinā
śhṛṇutan’ dhiṣh’ṇyā yuvam ॥ 4 ॥

तमीशा॑नं जग॑तस्त॒स्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यम् ।
पू॒षा नो॒ यथा॒ वेद॑सा॒मस॑द्वृधे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥५॥

tamīśhāānañ’ jaga-tas’tas’thuṣhas’patin’n’
dhiyañ’jin’vamava-sē hūmahē vayam ।
pūṣhā nō yathā vēda-sāmasad’vṛdhē rak’ṣhitā
pāyuradab’dhas’ svas’tayēē ॥ 5 ॥

स्व॒स्ति न॒ , इन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॒ , अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥६॥

svas’ti na , in’drōō vṛd’dhaśh’ra-vās’
svas’ti na[fp]’ pūṣhā viśh’vavēēdā-ḥa ।
svas’ti nas’tārk’ṣhyō , ariṣh’ṭanēmis’
svas’ti nō bṛhas’patir’dadhātu ॥ 6 ॥

पृष॑दश्वा म॒रुतः॒ पृश्नि॑मातरः शु॒भं॒यावा॑नो वि॒दथे॑षु॒ जग्म॑यः ।
अ॒ग्नि॒जि॒ह्वा मन॑वः॒ सूर॑चक्षसो॒ विश्वे॑ नो दे॒वा , अव॒सा गम॑न्नि॒ह ॥७॥

pṛṣha-daśh’vā maruta[fp]’ pṛśh’ni-mātaraśh’
śhubhañ’yāvāānō vidathēēṣhu jag’ma-yaḥa ।
ag’nijih ’vā mana-vas’ sūra-chak’ṣhasō
viśh’vēē nō dēvā , avasā ga-man’niha ॥ 7 ॥

www.sanskritveda.net
www.vedaviswa.com

भ॒द्रं कर्णे॑भिः शृणु॒याम देवा भ॒द्रं प॑श्येमा॒क्षभि॒र्य॑जत्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वांस॑स्त॒नूभि॒र्व्य॑शेम दे॒वहि॑तं॒ यदायुः ॥८॥

bhad’raṅ’ kar’ṇēēbhiśh’ śhṛṇuyāma dēvā
bhad’ram’ paśh’yēmāk’ṣhabhir’r’yajat’rā-ḥa ।
sthirairaṅ’gaiīs’tuṣh’ṭuvāṁ’sas’tanūbhir’vya-śhēma
dēvahi-tañ’ yadāyu-ḥu ॥ 8 ॥

श॒तमिन्नु श॒रदो॒ , अन्ति॑ दे॒वा॒ यत्रा॑ नश्च॒क्रा ज॒रसं॑ त॒नूना॑म् ।
पु॒त्रासो॒ यत्र॑ पि॒तरो॒ भव॑न्ति॒ मा नो॑ म॒ध्या री॑रिष॒तायु॒र्गन्तो॑ः ॥९॥

śhatamin’nu śharadō , an’ti- dēvā yat’rāā
naśh’chak’rā jarasan’n’ tanūnāām ।
put’rāsō yat’ra- pitarō bhavan’n’ti mā nōō
madh’yā rīīriṣhatāyur’gan’tōōḥo ॥ 9 ॥

अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्षमदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः ।
विश्वे॑ दे॒वा , अदि॑तिः॒ पञ्च॒ जना॒ , अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् ॥१०॥

adi-tir’dyauradi-tiran’tarik’ṣhamadi-tir’mātā
sa pitā sa put’raḥa ।
viśh’vēē dēvā , adi-ti[fp]’ pañ’cha janā ,
adi-tir’jātamadi-tir’janit’vam ॥ 10 ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.saiveda.net
www.vedavishwa.com

[RV S 1-90 (Kāñchī Pāṭhaḥa)]

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् । अर्यमा देवैः सजोषाः ॥ १ ॥
ṛjunītī nō varu-ṇō mit’rō na-yatu vid’vā-ne ।
ar’yamā dēvais’ sajōṣhāāḥa ॥ 1 ॥

ते हि वस्वो वसवानास्ते , अप्रमूरा महोभिः । व्रता रक्षन्ते विश्वाहा ॥ २ ॥
tē hi vas’vō vasa-vānās’tē , ap’ra-mūrā mahōōbhiḥi ।
vratā rak’ṣhan’tē viśh’vāhāā ॥ 2 ॥

ते , अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः । बाधमाना , अप द्विषः ॥ ३ ॥
tē , as’mabh’yaṁ’ śhar’ma-
yaṁ’san’namṛtā mar’tyēēbh’yaḥa ।
bādha-mānā , apad’ dviṣha-ḥa ॥ 3 ॥

वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः । पूषा भगो वन्द्यासः ॥ ४ ॥
vi na[fp]’ pathas’ su-vitāya-
chiyan’tvin’drōō maruta-ḥa ।
pūṣhā bhagō van’dyāāsaḥa ॥ 4 ॥

उत नो धियो गो , अग्राः पूषन्विष्णवेवयावः ।
कर्ता नः स्वस्तिमतः ॥ ५ ॥
uta nō dhiyō gō , ag’rā[fp]’
pūṣhan’viṣh’ṇavēva-yāvaḥa ।
kar’tāā nas’ svas’timata-ḥa ॥ 5 ॥

www.sanskritdocuments / www.vedavishwa.com

मधु वाता॑ , ऋतायते मधु॑ क्षरन्ति सिन्ध॑वः । माध्वी॑र्नः सन्त्वोष॑धीः ॥६॥

madhu vātāā , ṛtāyatē madhuk’

kṣharan’ti sin’dha-vaḥa ।

mādh’vīīr’nas’ san’tvōṣha-dhī-ḥi ॥ 6 ॥

मधु नक्त॑मुतोषसो मधु॑मत्पार्थि॑वं रजः॑ । मधु द्यौर॑स्तु नः पिता ॥७॥

madhu nak’ta-mutōṣhasō

madhu-mat’pār’thi-vaṁ’ raja-ḥa ।

madhud’ dyauras’tu na[fp]’ pitā ॥ 7 ॥

मधु॑मान्नो वनस्पतिर्मधु॑माँ , अस्तु सूर्यः॑ । माध्वीर्गावो॑ भवन्तु नः ॥८॥

madhu-mān’nō vanas’patir’madhu-māṁ̐ ,

as’tu sūr’ya-ḥa ।

mādh’vīr’gāvōō bhavan’tu naḥa ॥ 8 ॥

शं नो॑ मित्रः शं वरु॑णः शं नो॑ भवत्वर्यमा ।

शं न , इन्द्रो बृहस्पतिः शं नो विष्णु॑रुरुक्रमः ॥९॥

śhan’ nōō mit’raśh’ śhaṁ’ varu-ṇaśh’

śhan’ nōō bhavat’var’yamā ।

śhan’ na , in’drō bṛhas’patiśh’ śhan’ nō
viṣh’ṇu-ruruk’ramaḥa ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः॑ ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.shivedamnet www.vedavishwa.com

# Agni Sūktam

[RV S 1-1-1 to 1-1-7 (Kāñchī Pāṭhaḥa)]

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १ ॥

ॐ ag'nimīīḻē purōhi-tañ'

yaj'ñas'ya- dēvamṛt'vijam'm ।

hōtāāraṁ' rat'nadhāta-mam ॥ 1 ॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ , एह वक्षति ॥ २ ॥

ag'ni[fp]' pūr'vēēbhir'ṛshi-bhirīḍ'yō nūta-nairuta ।

sa dēvām̐' , ēha vak'ṣhati ॥ 2 ॥

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥ ३ ॥

ag'ninā rayimaśh'navat'pōṣha-mēva divēdi-vē ।

yaśhasaṁ'm' vīravat'tamam ॥ 3 ॥

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स , इद्देवेषु गच्छति ॥ ४ ॥

ag'nē yañ' yaj'ñamadh'varaṁ'

viśh'vata[fp]' paribhūrasi- ।

sa , id'dēvēṣhu- gat'chhati ॥ 4 ॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरा गमत् ॥ ५ ॥

ag'nir'hōtāā kavik'ra-tus'

sat'yaśh'chit'raśh'ra-vas'tamaḥa ।

dēvō dēvēbhirā ga-mate ॥ 5 ॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

yadaṅ'ga dāśhuṣhēt' tvamag'nēē

bhad'raṅ' ka-riṣh'yasi- ।

tavēt'tat'sat'yamaṅ'ṅ'giraḥa ॥ 6 ॥

उप॑ त्वाग्ने दि॒वेदि॑वे दोषा॑वस्तर्धि॒या व॒यम् । नमो॒ भरन्॑त॒ , एम॑सि ॥७॥

upat' tvāg'nē divēdi-vē dōṣhāāvas'tar'dhiyā vayam ।
namō bharan'n'ta , ēma-si ॥ 7 ॥

राजन्॑तमध्व॒राणा॑ं गो॒पामृतस्य॒ दीदि॑विम् । वर्ध॑मानं॒ स्वे दमे॑ ॥ ८ ॥

rājan'n'tamadh'varāṇāāṅ' gōpāmṛtas'ya dīdi-vim ।
var'dha-mānaṁ' svē damēē ॥ 8 ॥

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सू॒पाय॒नो भ॑व । सच॑स्वा नः॒ स्व॒स्तये॑ ॥ ९ ॥

sa na[fp]' pitēva- sūnavē (a)g'nēē sūpāyanō bha-va ।
sachas'vā nas' svas'tayēē ॥ 9 ॥

ॐ शान्तिः॒ शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Ātma Upāsanā Mantrāḥa

### Ātma Sūktam

[KY TB 2-3-11-1 to 2-3-11-4]

ॐ ब्रम्हा॑त्म॒न्वद॑सृजत । तद॑कामयत ।

ॐ bram'hāā (ā)t'man'vadasṛjata । tadakāmayata ।

समा॒त्मना॑ पद्ये॒येति॑ । आ॒त्म॒न्नात्म॒न्नित्याम॑न्त्रयत ।

samāt'manā pad'yēyēti ।
āt'man'nāt'man'nit'yāman'trayata ।

तस्मै॑ द॒शमग्ं॑ हू॒तः प्रत्य॑श्‍ृणोत् । स दश॑हूतोऽभवत् ।

tas'mai daśhamagm' hūta[fp]' prat'yaśhṛṇō-te ।
sa daśhahūtō (a)bhavate ।



www.saivedavishwa.com

दशहूतो ह वै नामैषः । तं वा , एतं दशहूतꣳ सन्तम् ।
daśhahūtō ha vai nāmaiṣhaḥa ।
taṁ' vā , ētan' daśhahūtagm' san'tam'm ।

दशहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया , इव हि देवाः ॥ १ ॥
daśhahōtēt'yāchak'ṣhatē parōk'ṣhēṇa ।
parōk'ṣhap'riyā , iva hi dēvā-ḥa ॥ 1 ॥

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै सप्तमꣳ हूतः प्रत्यशृणोत् ।
āt'man'nāt'man'nit'yāman'trayata ।
tas'mai sap'tamagm' hūta[fp]' prat'yaśhṛṇō-te ।

स सप्तहूतोऽभवत् । सप्तहूतो ह वै नामैषः ।
sa sap'tahūtō (a)bhavate ।
sap'tahūtō ha vai nāmaiṣhaḥa ।

तं वा , एतꣳ सप्तहूतꣳ सन्तम् । सप्तहोतेत्याचक्षते परोक्षेण ।
taṁ' vā , ētagm' sap'tahūtagm' san'tam'm ।
sap'tahōtēt'yāchak'ṣhatē parōk'ṣhēṇa ।

परोक्षप्रिया , इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत ।
parōk'ṣhap'riyā , iva hi dēvā-ḥa ।
āt'man'nāt'man'nit'yāman'trayata ।

तस्मै षष्ठꣳ हूतः प्रत्यशृणोत् । स षड्ढूतोऽभवत् ॥ २ ॥
tas'mai ṣhaṣh'ṭhagm' hūta[fp]' prat'yaśhṛṇō-te ।
sa ṣhaḍ'dhūtō (a)bhavate ॥ 2 ॥



www.vedavishwa.com

षड्भूतो ह वै नामैषः । तं वा , एतᳬ षड्भूतᳬ सन्तम् ।

ṣhaḍ' ḍhūtō ha vai nāmaiṣhaḥa ।

taṁ' vā , ētagm' ṣhaḍ'ḍhūtagm' san'tam'm ।

षड्ढोतेत्याचक्षते परोक्षेण । परोक्षप्रिया , इव हि देवाः ।

ṣhaḍ'ḍhōtēt'yāchak'ṣhatē parōk'ṣhēṇa ।

parōk'ṣhap'riyā , iva hi dēvā-ḥa ।

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै पञ्चमᳬ हूतः प्रत्यश्रृणोत् ।

āt'man'nāt'man'nit'yāman'trayata ।

tas'mai pañ'chamagm' hūta[fp]' prat'yaśhṛṇō-te ।

स पञ्चहूतोऽभवत् । पञ्चहूतो ह वै नामैषः ।

sa pañ'chahūtō (a)bhavate ।

pañ'chahūtō ha vai nāmaiṣhaḥa ।

तं वा , एतं पञ्चहूतᳬ सन्तम् । पञ्चहोतेत्याचक्षते परोक्षेण ॥ ३ ॥

taṁ' vā , ētam' pañ'chahūtagm' san'tam'm ।

pañ'chahōtēt'yāchak'ṣhatē parōk'ṣhēṇa ॥ 3 ॥

परोक्षप्रिया , इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत ।

parōk'ṣhap'riyā , iva hi dēvā-ḥa ।

āt'man'nāt'man'nit'yāman'trayata ।

तस्मै चतुर्थᳬ हूतः प्रत्यश्रृणोत् । स चतुर्हूतोऽभवत् ।

tas'mai chatur'thagm' hūta[fp]' prat'yaśhṛṇō-te ।

sa chatur'hūtō (a)bhavate ।



www.sanskritvedavishwa.com

चतुर्हूतो ह वै नामैषः । तं वा , एतं चतुर्हूतꣳ सन्तम् ।
chatur'hūtō ha vai nāmaiṣhaḥa ।
taṁ' vā , ētañ' chatur'hūtagm' san'tam'm ।

चतुर्होतेत्याचक्षते परोक्षेण । परोक्षप्रिया , इव हि देवाः ।
chatur'hōtēt'yāchak'ṣhatē parōk'ṣhēṇa ।
parōk'ṣhap'riyā , iva hi dēvā-ḥa ।

तमब्रवीत् । त्वं वै मे नेदिष्ठꣳ हूतः प्रत्यश्रौषीः ।
tamab'ravī-te ।
tvaṁ' vai mē nēdiṣh'ṭhagm'
hūta[fp]' prat'yaśh'rauṣhī-ḥi ।

त्वयैनानाख्यातार , इति । तस्मान्नु हैनाङ्श्चतुर्होतार , इत्याचक्षते ।
tvayainānākh'yātāra , iti ।
tas'mān'nu hainągeśh'chatur'hōtāra , it'yāchak'ṣhatē ।

तस्माच्छुश्रूषुः पुत्राणाꣳ हृद्यतमः । नेदिष्ठो हृद्यतमः ।
tas'māāt'chhuśh'rūṣhu[fp]'
put'rāṇāgm' hṛd'yatamaḥa ।
nēdiṣh'ṭhō hṛd'yatamaḥa ।

नेदिष्ठो ब्रम्हणो भवति । य , एवं वेद ॥४॥
nēdiṣh'ṭhōb' bram'haṇō bhavati । ya , ēvaṁ' vēda ॥ 4 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saiveda.net www.vedavishwa.com

## Āyuṣhya Sūktam

[As per tradition]

ॐ यो ब्रम्हा ब्रम्हण , उज्जहार प्राणैः शिरः कृत्तिवासाँः पिनाकी ।
ईशानो देवः स न , आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

ॐ yōb' bram'hāb' bram'haṇa , uj'jahārap' prāṇaiśh'
śhira[hk]' kṛt'tivāsāā[fp]' pinākī ।
īśhānō dēvas' sa na , āyur'dadhātu tas'mai
juhōmi haviṣhā ghṛtēna ॥ 1 ॥

विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचिर्य , आगात् ।
स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः ॥ २ ॥

vibh'rājamānas' sariras'ya madh'yād' drōchamānō
ghar'maruchir'ya , āgā-te ।
sa mṛt'yupāśhānapanud'ya ghōrānihāyuṣhēṇō
ghṛtamat'tu dēvaḥa ॥ 2 ॥

ब्रम्हज्योति-ब्रम्ह-पत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम् ।
सुवर्णरम्भग्रह मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ३ ॥

bram'haj'yōtir' bram'ha pat'nīṣhu gar'bhañ'
yamādadhāt' pururūpañ' jayan'tam ।
suvar'ṇaram'bhag'raha mar'kamar'chyan' tamāyuṣhē
var'dhayāmō ghṛtēna ॥ 3 ॥

श्रियं लक्ष्मी मौबला मम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः ।

śhriyaṁ' lak'ṣhmī maubalā mam'bikāṅ' gāṇ'
ṣhaṣh'ṭhīñ' cha yāmin'drasēnēēt'yudāhuḥu ।

तां विद्यां ब्रम्हयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन ॥ ४ ॥

tāṁ’ vid’yām’ bram’hayōnigm’ sarūpāmihāyuṣhē
tar’payāmō ghṛtēna ॥ 4 ॥

दाक्षायण्यः सर्वयोन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः ।
ससूनवः सपतयः सयूथ्या , आयुषेणो घृतमिदं जुषन्ताम् ॥५॥

dāk’ṣhāyaṇ’yas’ sar’vayōn’yas’ sa yōn’yas’ sahas’raśhō
viśh’varūpā virūpā-ḥa ।
sasūnavas’ sapatayas’ sayūth’yā , āyuṣhēṇō
ghṛtamidañ’ juṣhan’tām ॥ 5 ॥

दिव्या गणा बहुरूपाः पुराणा , आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥६॥

div’yā gaṇā bahurūpā[fp]’ purāṇā , āyuśh’chhidō
na[fp]’ pramath’nan’tu vīrā-ne ।
tēbh’yō juhōmi bahudhā ghṛtēna mā na[fp]’ prajāgm’
rīriṣhō mōta vīrā-ne ॥ 6 ॥

एकः पुरस्तात् य , इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनꣳ साम्पराये स नो हविर्घृत-मिहायुषेत्तु देवः ॥७॥

ēka[fp]’ puras’tāt’ ya , idam’ babhūva yatō babhūva
bhuvanas’ya gōpā-ḥa ।
yamap’yēti bhuvanagm’ sāām’parāyē sa nō havir’ghṛta
mihāyuṣhēēt’tu dēvaḥa ॥ 7 ॥



www.vedavishwa.com

वसून् रुद्रां-नादित्यान् मरुतोंऽथ साध्यान् ,

ऋभून् यक्षान् गन्धर्वांश्च पितृंश्च विश्वान् ।

भृगून् सर्पांश्चाङ्गिरसोंऽथ सर्वान् घृतं

हुत्वा स्वायुष्या महयाम शश्वत् ॥ ८ ॥

vasūn’ rud’rā nādit’yān’ marutō (a)tha sādh’yān ,

ṛbhūn’ yak’ṣhān’ gan’dhar’vāgeśh’cha pitṝgeśh’cha viśh’vā-ne ।

bhṛgūn’ sar’pāgeśh’chāṅ’girasō (a)tha sar’vān’ ghṛtagm’

hut’vās’ svāyuṣh’yā mahayāma śhaśh’vate ॥ 8 ॥

विष्णो त्वं नो , अन्तमश्शर्मयच्छ सहन्त्य ।

प्रतेधारा मधुश्चुत , उत्सं दुहते , अक्षितम् ॥ ९ ॥

viṣh’ṇōt’ tvan’ nō ,

an’tamaśh’śhar’mayat’chha sahan’tya ।

pratēdhārā madhuśh’chuta ,

uth’san’ duh’ratē , ak’ṣhitam ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.saiveda.net www.vedavishwa.com

## Mṛttikā Sūktam

[KYV TA 10-1-8&9]

ॐ भूमिर्धेनुर्धरणी लोकधारिणी ।

ॐ bhūmir'dhēnur'dharaṇī lōkadhāriṇī ।

उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ।

ud'dhṛtā (a)si varāhēṇa kṛṣh'ṇēna śhatabāhunā ।

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।

mṛt'tikē hana mē pāpañ' yan'mayā duṣh'kṛtaṅ' kṛtam ।

मृत्तिके ब्रम्हदत्ताऽऽसि काश्यपेनाभिमन्त्रिता ।

mṛt'tikēēb' bram'hadat'tā (ā)si

kāśh'yapēnābhiman'tritā ।

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ।

mṛt'tikē dēhi mē

puṣh'ṭin' tvayi sar'vam' pratiṣh'ṭhitam ।

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।

mṛt'tikēēp' pratiṣh'ṭhitē

sar'van' tan'mē nir'ṇuda mṛt'tikē ।

तया हतेन पापेन गच्छामि परमां गतिम् ॥

tayā hatēna pāpēna gat'chhāmi paramāṅ' gatim ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saivedavishwa.com

## Nāsadīya Sūktam

[KYV TB 2-8-9-3 to 2-8-9-7] & *[RV S 10-129]*

ॐ नास॑दासी॒न्नो सदा॑सीत् त॒दानी॓म् । नासी॒द्रजो॒ नो व्यो॑माप॒रो यत् ।

**ॐ nāsadāsīn'nō sadāsīt' tadānīīm |**

**nāsīd'rajō nōv' vyōmāparō yate |**

कि॒माव॑री व॒ः कु॒ह॒ कस्य॒ शर्म॒न्ने॑ । अम्भ॒ः किमा॑सीद् ग॒ह॑नं गभी॒रम् ॥ १ ॥

**kimāvarī va[hk]' kuha kas'ya śhar'man'ne |**

**am'bha[hk]' kimāsīd' gahanaṅ' gabhīram || 1 ||**

न मृ॒त्युर॒मृत॒ं त॒र्हि न । रात्रि॑या॒ , अन्ह॑ , आसीत्प्र॒केत॒ः ।

**na mṛt'yuramṛtan' tar'hi na |**

**rāt'riyā , an'ha , āsīt'prakētaḥa |**

आनी॑द्वा॒तङ्ग्ँ स्व॒धया॒ तदेक॓म् ।

तस्मा॓द्धा॒न्यं न प॒रः किं च॒ नाऽऽस॑ ॥ २ ॥

**ānīdavātag'ges' svadhayā tadēkam'm |**

**tas'māād'dhān'yan' na para[hk]' kiñ' cha nā (ā)sa || 2 ||**

तम॑ , आसी॒त्तम॑सा गूढमग्रे॓ प्र॒केतम् । स॒लि॒लꣳ सर्व॑मा , इ॒दम् ।

**tama , āsīt'tamasā gūḍhamag'rēēp' prakētam |**

**salilagm' sar'vamā , idam |**

तु॒च्छेना॒भ्वपि॑हितं॒ यदासी॓त् । तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैक॓म् ॥ ३ ॥

**tut'chhēnābh'vapihitañ' yadāsīīte |**

**tamasas'tan'mahinā jāyataikam'm || 3 ||**

www.vedavishwa.com

कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ।
kāmas’tadag’rē samavar’tatādhi ।
manasō rēta[fp]’ prathamañ’ yadāsīīte ।

सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥
satō ban’dhumasati niravin’dan’ne ।
hṛdip’ pratīṣh’yā kavayō manīṣhā ॥ 4 ॥

तिरश्चीनो विततो रश्मिरेषाम् । अधस्स्विदासी३दुपरि स्विदासी३त् ।
tiraśh’chīnō vitatō raśh’mirēṣhām ।
adhas’svidāsī3duparis’ svidāsī3te ।

रेतोधा , आसन्महिमान , आसन् ।
स्वधा , अवस्तात्प्रयतिः परस्तात् ॥ ५ ॥
rētōdhā , āsan’mahimāna , āsan’ne ।
svadhā , avas’tāt’prayati[fp]’ paras’tāāte ॥ 5 ॥

को , अद्धा वेद क , इह प्रवोचत् । कुत , आजाता कुत , इयं विसृष्टिः ।
kō , ad’dhā vēda ka , ihap’ pravōchate ।
kuta , ājātā kuta , iyaṁ’ visṛṣh’ṭiḥi ।

अर्वाग्देवा , अस्य विसर्जनाय । अथा को वेद यत , आ बभूव ॥ ६ ॥
ar’vāg’dēvā , as’ya visar’janāya ।
athā kō vēda yata , ā babhūva ॥ 6 ॥

www.sanskritweb / www.vedavishwa.com

इयं विसृष्टिर्यत , आबभूव । यदि वा दधे यदि वा न ।
iyaṁ' visṛṣh'ṭir'yata , ābabhūva I
yadi vā dadhē yadi vā na I

यो , अस्याध्यक्षः परमे व्योमन् । सो , अङ्ग वेद यदि वा न वेद ॥ ७ ॥
yō , as'yādh'yak'ṣha[fp]' paramēv' vyōman'ne I
sō , aṅ'ga vēda yadi vā na vēda II 7 II

किङ्स्विद्वनं क , उ स वृक्ष , आसीत् । यतो द्यावापृथिवी निष्टतक्षुः ।
kig'ges'vid'vanaṅ' ka , u sa vṛk'ṣha , āsī-te I
yatōd' dyāvāpṛthivī niṣh'ṭatak'ṣhuḥu I

मनीषिणो मनसा पृच्छतेदु तत् । यदध्यतिष्ठद् भुवनानि धारयन्न् ॥ ८ ॥
manīṣhiṇō manasā pṛt'chhatēdu tate I
yadadh'yatiṣh'ṭhad' bhuvanāni dhārayan'ne II 8 II

ब्रम्ह वनं ब्रम्ह स वृक्ष , आसीत् । यतो द्यावापृथिवी निष्टतक्षुः ।
bram'ha vanam' bram'ha sa vṛk'ṣha , āsī-te I
yatōd' dyāvāpṛthivī niṣh'ṭatak'ṣhuḥu I

मनीषिणो मनसा विब्रवीमि वः । ब्रम्हाध्यतिष्ठद् भुवनानि धारयन्न् ॥ ९ ॥
manīṣhiṇō manasā vib'ravīmi vaḥa I
bram'hādh'yatiṣh'ṭhad' bhuvanāni dhārayan'ne II 9 II

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi II

www.sarveda.net www.vedavishwa.com

## Viṣhṇu Sūktam

[Ṛk-Saṁhitā & Taittirīya Śhākhā]

विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांऽसियो ,
अस्कभायदुत्तरऽ सधस्थं विचक्रमाणस्त्रेधोरुगायः ।

vịsh'ṇōr'nukaṁ' vīr'yāṇip' pra vōchañ' ya[fp]'
pār'thivāni vimamē rajāgm'siyō ,
as'kabhāyadut'taragm' sadhas'thaṁ'
vichak'ramāṇas'trēdhōrugāyaḥa ।

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्ञ्यप्त्रे स्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

vịsh'ṇō rarāṭamasi vịsh'ṇōō[fp]' pṛsh'ṭhamasi
vịsh'ṇōśh' śhñyap'trēēs' sthō vịsh'ṇōs' syūrasi
vịsh'ṇōōr'dhruvamasi vaịsh'ṇavamasi
vịsh'ṇavēt' tvā ॥ [KYV TS 1-2-13-3]

तदस्य प्रियमभि पाथो , अश्याम् । नरो यत्र देवयवो मदन्ति ।

tadas'yap' priyamabhi pāthō , aśh'yām ।
narō yat'ra dēvayavō madan'ti ।

उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व , उत्सः ।

uruk'ramas'ya sa hi ban'dhurit'thā ।
vịsh'ṇōō[fp]' padē paramē madh'va , ut'saḥa । [KYV TB 2-4-6-2]

प्र तद्विष्णुः स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।

pra tad'vịsh'ṇus' stavatē vīr'yāya ।
mṛgō na bhīma[hk]' kucharō girịsh'ṭhā-ḥa ।



www.vedavisvam.net

यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥
yas'yōrushut' trishu vik'ramaṇēṣhu ।
adhik'ṣhiyan'ti bhuvanāni viśh'vāā ॥ [KYV TB 2-4-3-4]

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ।
parō māt'rayā tanuvā vṛdhāna ।
na tē mahit'vaman'vaśh'nuvan'ti ।

उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् । परमस्य वित्से ॥
ubhē tē vid'ma rajasī pṛthiv'yā viṣh'ṇō dēvat' tvam ।
paramas'ya vit'sē ॥ [KYV TB 2-8-3-2]

विचक्रमे पृथिवीमेष , एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
vichak'ramē pṛthivīmēṣha , ētām ।
kṣhēt'rāya viṣh'ṇur'manuṣhē daśhas'yan'ne ।

ध्रुवासो , अस्य कीरयो जनासः । उरुक्षितिꣳ सुजनिमाचकार ।
dhruvāsō , as'ya kīrayō janāsaḥa ।
uruk'ṣhitigm' sujanimāchakāra ।

त्रिर्देवः पृथिवीमेष , एताम् । विचक्रमे शतर्चसं महित्वा ।
trir'dēva[fp]' pṛthivīmēṣha , ētām ।
vichak'ramē śhatar'chasam' mahit'vā ।

प्र विष्णुरस्तु तवसस्तवीयान् । त्वेषꣳह्यस्य स्थविरस्य नाम ॥
pra viṣh'ṇuras'tu tavasas'tavīyā-ne ।
tvēṣhag'geh'yas'yas' sthaviras'ya nāma ॥ [KYV TB 2-4-3-5]



www.vaidika.net www.vedavishwa.com

अतो॑ दे॒वा , अ॑वन्तु॒नो॒ यतो॒ विष्णु॑र्विचक्र॒मे । पृ॒थि॒व्याः स॒प्त धाम॑भिः ॥

atōō dēvā , avan’tunō yatō viṣh’ṇur’r’vichak’ramē ǀ

pṛthiv’yās’ sap’ta dhāmabhiḥi ǁ [RV S 1-22-16]

इ॒दं विष्णु॒र्वि च॑क्रमे त्रे॒धा नि द॑धे प॒दम् । समू॑ढमस्य पाꣳसु॒रे ॥

idaṁ’ viṣh’ṇur’vi chak’ramēt’ trēdhā ni dadhē padam ǀ

samūḍhamas’ya pāgm’surē ǁ [KYV TS 1-2-13-1&2] [RV S 1-22-17]

त्रीणि॑ प॒दा वि च॑क्रमे॒ विष्णु॑र्गो॒पा , अदा॑भ्यः । ततो॒ धर्मा॑णि धा॒रय॑न् ॥

trīṇi padā vi chak’ramē viṣh’ṇur’gōpā , adāābh’yaḥa ǀ

tatō dhar’māṇi dhārayan’ne ǁ [KYV TB 2-4-6-1] [RV S 1-22-18]

विष्णोः॒ कर्मा॑णि पश्यत॒ यतो॑ व्र॒तानि॑ पस्प॒शे । इन्द्र॑स्य॒ युज्यः॒ सखा॑ ॥

viṣh’ṇō[hk]’ kar’māṇi paśh’yata yatōōv’

vratāni pas’paśhē ǀ

in’dras’ya yuj’yas’ sakhāā ǁ [KYV TS 1-3-6-2] [RV S 1-22-19]

तद् विष्णोः॑ प॒र॒मं प॒दꣳ सदा॑ पश्यन्ति सू॒रयः॑ । दि॒वीव॒ चक्षु॒रात॑तम् ॥

tad’ viṣh’ṇōō[fp]’ paramam’ padagm’

sadā paśh’yan’ti sūrayaḥa ǀ

divīva chak’ṣhurātatam ǁ [KYV TS 1-3-6-2] [RV S 1-22-20]

तद् विप्रा॑सो विप॒न्यवो॑ जागृ॒वांसः॒ समि॑न्धते । विष्णो॒र्यत् प॑र॒मं प॒दम् ॥

tad’ vip’rāāsō vipan’yavōō

jāgṛvām’sas’ samin’n’dhatē ǀ

viṣh’ṇōr’yat’ paramam’ padam ǁ [RV S 1-22-21]

www.saivedavishwa.com

पर्या॒प्त्या , अन॑न्तरायाय॒ सर्व॑स्तोमोऽतिरा॒त्र ,
उ॒त्तममह॑र्भवति॒ सर्व॑स्याऽऽप्त्यै॒ सर्व॑स्य॒ जित्यै॒ सर्व॑मे॒व
तेना॑ऽऽप्नोति॒ सर्वं॑ जयति ॥

par'yāāp'tyā , anan'tarāyāya sar'vas'tōmō (a)tirāt'ra ,
ut'tamamahar'bhavati sar'vas'yā (ā)p'tyai
sar'vas'ya jit'yai sar'vamēva
tēnāā (ā)p'nōti sar'vañ' jayati ॥ [KYV TS 5-4-12-3]

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Navagraha Sūktam

[YV ; RV ; SV ; AV]

ॐ आ स॒त्येन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑च ।
ॐ ā sat'yēna rajasā var'tamānō
nivēśhayan'namṛtam' mar'tyañ'cha ।

हि॒र॒ण्यये॑न सवि॒ता रथे॒नाऽऽदे॒वो या॑ति॒ भुव॑ना वि॒पश्य॑न् ।
hiraṇ'yayēna savitā rathēnā (ā)dēvō
yāti bhuvanā vipaśh'yan'ne । [KYV TS 3-4-11-6]
*& [RV S 1-35-2 // SYM 33-43, 34-31 // SYK 32-43, 33-25]*

अ॒ग्निं दू॒तं वृ॑णीमहे । होता॑रं वि॒श्ववे॑दसम् । अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु॑म् ॥
ag'nin' dūtam' vṛṇīmahē । hōtāram' viśh'vavēdasam ।
as'ya yaj'ñas'ya suk'ratum'm ॥ [KYV TB 3-5-2-3]
*& [RV S 1-12-1 // SV 3-790 // AV 20-101-1]*

www.sanskritweb.net / www.vedavishwa.com

येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् ।

yēṣhāmīśhē paśhupati[fp]’ paśhūnāñ’
chatuṣh’padāmuta chad’ dvipadāām |

निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥

nish’krītō (a)yañ’ yaj’ñiyam’ bhāgamētu rāyas’pōṣhā
yajamānas’ya san’tu ॥ [KYV TS 3-1-4-4]

ॐ अधिदेवता प्रत्यधिदेवता सहिताय , आदित्याय नमः ॥ १ ॥

ॐ adhidēvatāp’ prat’yadhidēvatā
sahitāya , ādit’yāya namaḥa ॥ 1 ॥

*********

ॐ आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥

ॐ āp’ pyāyas’va samētu tē
viśh’vatas’ sōma vṛṣh’ṇiyam |
bhavā vājas’ya saṅ’gathē ॥ [KYV TS 3-2-5-8, 4-2-7-12]

*& [RV S 1-91-16, 9-31-4 // SYM 12-112 // SYK 13-111 // Tāṇḍya Brāmhaṇa 1-5-8]*

अप्सुमे सोमो , अब्रवीत् । अन्तर्विश्वानि भेषजा ।
अग्निं च विश्वशम्भुवम् । आपश्च विश्वभेषजीः ।

ap’sumē sōmō , ab’ravī-te | an’tar’viśh’vāni bhēṣhajā |
ag’niñ’ cha viśh’vaśham’bhuvam |
āpaśh’cha viśh’vabhēṣhajī-ḥi | [KYV TB 2-5-8-6]

*& [RV S 1-23-20, 10-9-6 // AV 1-6-2]*

गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी ।

gaurī mimāya salilāni tak'ṣhatī ।
ēkapadīd' dvipadī sā chatuṣh'padī ।

अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योमन् ।

ash'ṭāpadī navapadī babhūvuṣhīī ।
sahas'rāāk'ṣharā paramēv' vyōman'ne ।

[KYV TB 2-4-6-11 / / KYV TA 1-9-4]
*& [RV S 1-164-41 // AV 9-10-21,13-1-42 // Nighaṇṭu 11-40]*

ॐ अधिदेवता प्रत्यधिदेवता सहिताय सोमाय नमः ॥ २ ॥

ॐ adhidēvatāp' prat'yadhidēvatā
sahitāya sōmāya namaḥa ॥ 2 ॥

*********

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या , अयम् ।

ॐ ag'nir'mūrd'dhā diva[hk]'
kakut'pati[fp]' pṛthiv'yā , ayam ।

अपाꣳ रेताꣳसि जिन्वति ।

apāgm' rētāgm'si jin'vati । [KYV TS 1-5-5-3, 4-4-4-1 / / KYV TB 3-5-7-1]
*& [RV S 8-44-16 // SYM 3-12, 13-14, 15-20 // SYK 3-18, 16-41 // SV 27-1532]*

स्योना पृथिवि भवा नृक्षरा निवेशनी ।

syōnā pṛthivi bhavā nṛk'ṣharā nivēśhanī ।

यच्छा नः शर्म सप्रथाः ।

yat'chhā naśh' śhar'ma sap'rathāāḥa । [KYV TA 10-1-10]
*& [RV S 1-22-15 // SYM 35-21, 36-13 // SYK 35-54, 36-13 // AV 18-2-19 // Nigh 9-32]*



www.saivedavishwa.com

क्षेत्रस्य पतिना वयꣳ हितेनेव जयामसि ।

kṣhēt’ras’ya patinā vayagm’ hitēnēva jayāmasi ।

गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥

gāmaśh’vam’ pōṣhayit’nvā

sa nō mṛḍātīdṛśhēē ॥ [KYV TS 1-1-14-7]

*& [RV S 4-57-1 // Nigh 10-15]*

ॐ अधिदेवता प्रत्यधिदेवता सहिताय , अङ्गारकाय नमः ॥ ३ ॥

ॐ adhidēvatāp’ prat’yadhidēvatā

sahitāya , aṅ’gārakāya namaḥa ॥ 3 ॥

*********

ॐ उद्बुध्यस्वाग्ने प्रति जागृह्येनमिष्टापूर्ते सꣳ सृजेथामयं च ।

ॐ ud’budh’yas’vāg’nēp’ prati jāgṛh’yēnamiṣh’ṭāpūr’tē

sagm’ sṛjēthāmayañ’ cha ।

पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाताꣳ सीत् त्वयि तन्तुमेतम् ॥

puna[hk]’ kṛṇ’vag’ges’tvā pitarañ’ yuvānaman’vātāgm’

sīt’ tvayi tan’tumētam ॥ [KYV TS 4-7-13-12]

*& [SYM 15-54, 18-61 // SYK 16-76, 20-31]*

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ।

idaṁ’ viṣh’ṇur’vichak’ramēt’ trēdhā ni dadhē padam ।

समूढमस्य पाꣳसुरे ॥

samūḍhamas’ya pāgm’surē ॥ [KYV TS 1-2-13-4]

*& [RV S 1-22-17 // SYM 5-15 // SYK 5-20 //*
*SV 222, 1669 // AV 7-26-4 // Nigh 12-29]*



www.saiveda.net
www.vedavisva.com

विष्णो॑ ररा॒टम॑सि॒ विष्णो॑ः पृ॒ष्ठम॑सि॒ विष्णो॒ः श्ञ्यप्त्रे॑ स्थो॒ विष्णो॒ः स्यूर॑सि॒
विष्णो॑र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा ।

vish'ṇō rarāṭamasi vish'ṇōō[fp]' pṛsh'ṭhamasi
vish'ṇōśh' śhñyap'trēēs' sthō vish'ṇōs' syūrasi
vish'ṇōōr' dhruvamasi vaish'ṇavamasi
vish'ṇavēt' tvā | [KYV TS 1-2-13-10]

ॐ अधिदेवता प्रत्यधिदेवता सहिताय बुधा॑य॒ नम॑ः ॥४॥
ॐ adhidēvatāp' prat'yadhidēvatā
sahitāya budhāya namaḥa ॥ 4 ॥

*********

ॐ बृह॑स्पते॒ , अति॒ यद॒र्यो , अर्हा॑द्द्यु॒माद्वि॒भाति॒ क्रतु॑म॒ज्जने॑षु ।
ॐ bṛhas'patē , ati yadar'yō ,
ar'hāād'yumād'vibhātik' kratumaj'janēṣhu |
यद्दी॒दय॒च्छव॑सर्तप्रजात॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम् ॥
yad'dīdayat'chhavasar'tap'rajāta tadas'māsud'
draviṇan' dhēhi chit'ram ॥ [KYV TS 1-8-22-7]
*& [RV S 2-23-15 // SYM 26-3 // SYK 28-4]*

इन्द्र॑ मरुत्व , इ॒ह पा॑हि॒ सोम॒ं यथा॑ शार्या॒ते , अपि॑बः सु॒तस्य॑ ।
in'dra marut'va , iha pāhi sōmañ' yathā
śhār'yātē , apibas' sutas'ya |
तव॒ प्रणी॑ती॒ तव॑ शूर॒ शर्म॒न्ना वि॑वासन्ति क॒वय॑ः सु॒यज्ञाः ॥
tavap' praṇītī tava śhūra śhar'man'nā
vivāsan'ti kavayas' suyaj'ñā-ḥa ॥ [KYV TS 1-4-18-1]
*& [RV S 3-51-7 // SYM 7-35 // SYK 7-35]*

www.saiveda.net www.vedavishwa.com

ब्रम्हं जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचौ वेन , आवः ।

bram'ha jaj'ñānam' prathamam'

puras'tād'vi sīmatas' suruchō vēna , āvaḥa ।

स बुध्नियां , उपमा , अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।

sa budh'niyā , upamā , as'ya viṣh'ṭhās' sataśh'cha

yōnimasataśh'cha vivaḥa । [KYV TS 4-2-8-4]

*& [SYM 13-3 // SYK 14-3 // AV 4-1-1, 5-6-1]*

ॐ अधिदेवता प्रत्यधिदेवता सहिताय बृहस्पतये नमः ॥५॥

ॐ adhidēvatāp' prat'yadhidēvatā

sahitāya bṛhas'patayē namaḥa ॥ 5 ॥

*********

ॐ प्र वः शुक्राय भानवे भरध्वम् । हव्यं मतिं चाग्नये सुपूतम् ॥

ॐ pra vaśh' śhuk'rāya bhānavē bharadh'vam ।

hav'yam' matiñ' chāg'nayē supūtam ॥

यो दैव्यानि मानुषा जनूंषि ।

yō daiv'yāni mānuṣhā janūgm'ṣhi । [KYV TB 2-8-2-3]

अन्तर्विश्वानि विद्मना जिगाति ॥

an'tar'viśh'vāni vid'manā jigāti ॥ [KYV TB 2-8-2-4] *& [RV S 7-4-1]*

इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् ।

in'drāṇīmāsu nāriṣhu supat'nīmahamaśh'ravam ।



www.sanskritweb.net www.vedavishwa.com

न ह्यस्या , अपरं चन जरसा मरते पतिः ॥

nah’ hyas’yā , aparañ’

chana jarasā maratē patiḥi ॥ [KYV TS 1-7-13-3]

*& [RV S 10-86-11 // AV 20-126-11 // Nigh 11-38]*

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥

in’draṁ’ vō viśh’vatas’pari havāmahē janēēbh’yaḥa ।

as’mākamas’tu kēvalaḥa ॥ [KYV TS 1-6-12-1]

*& [RV S 1-7-10 // SV 1620 // AV 20-39-1, 20-70-16]*

ॐ अधिदेवता प्रत्यधिदेवता सहिताय शुक्राय नमः ॥ ६ ॥

ॐ adhidēvatāp’ prat’yadhidēvatā

sahitāya śhuk’rāya namaḥa ॥ 6 ॥

*********

ॐ शं नो देवीरभिष्टय , आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

ॐ śhan’ nō dēvīrabhiṣh’ṭaya , āpō bhavan’tu pītayēē ।

śhañ’ yōrabhis’ravan’tu naḥa ॥

[KYV TA 4-42-4 / / KYV TB 1-2-1-1, 2-5-8-5]

*& [RV S 10-9-4 // SYM 36-12 // SYK 36-12 // SV 33 // AV 1-6-1]*

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।

prajāpatē nat’ tvadētān’yan’yō

viśh’vā jātāni pari tā babhūva ।

यत्कामास्ते जुहुमस्तन्नो , अस्तु वयꣳ स्याम पतयो रयीणाम् ।

yat’kāmās’tē juhumas’tan’nō , as’tu vayag’ges’

syāma patayō rayīṇām । [KYV TA 10-54-1]

इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः ।

imañ' yamap' pras'taramā hi sīdāṅ'girōbhi[fp]'
pitṛbhis' saṁ'vidānaḥa |

आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषा मादयस्व ॥

āt' tvā man'trāā[hk]' kaviśhas'tā vahan'tvēnā
rājan'haviṣhā mādayas'va || [KYV TS 2-6-12-15]

ॐ अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥७॥

ॐ adhidēvatāp' prat'yadhidēvatā
sahitāya śhanaiśh'charāya namaḥa || 7 ||

*********

ॐ कया नश्चित्र , आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।

ॐ kayā naśh'chit'ra , ā bhuvadūtī sadāvṛdhas' sakhāā |
kayā śhachiṣh'ṭhayā vṛtā | [KYV TS 4-2-11-9 / / KYV TA 4-42-3 ]

*& [RV S 4-31-1 // SYM 27-39, 36-4 //*
*SYK 29-44, 36-4 // SV 169, 682 // AV 20-124-1]*

आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवः ।

ā (a)yaṅ'gau[fp]'
pṛśh'nirak'ramīdasanan'mātaram' punaḥa |
pitarañ'chap' prayant'suvaḥa | [KYV TS 1-5-3-2 ]

*& [RV S 10-189-1 // SYM 3-6 //*
*SYK 3-6 // SV 630, 1376 // AV 6-31-1, 20-48-4]*

यत्ते देवी निरृतिराबबन्ध दामं ग्रीवास्वविचर्त्यम् ।

yat'tē dēvī nir'ṛtirābaban'dha dāmag'
grīvās'vavichar'tyam |

www.saivedavishwa.com

इदं ते तद्वि ष्याम्यायुंषो न मध्यादर्था जीवः पितुमंद्धि प्रमुंक्तः ॥

idan' tē tad'viṣh' ṣhyām'yāyuṣhō na madh'yādathā
jīva[fp]' pitumad'dhip' pramuk'taḥa ||

[KYV TS 4-2-5-8 ] *& [AV 6-63-1]*

ॐ अधिदेवता प्रत्यधिदेवता सहिताय राहवे नमः ॥८॥

ॐ adhidēvatāp' prat'yadhidēvatā
sahitāya rāhavē namaḥa || 8 ||

*********

ॐ केतुं कृण्वन्नंकेतवे पेशों मर्या , अपेशसें ।

ॐ kētuṅ' kṛṇ'van'nakētavē pēśhō mar'yā , apēśhasēē |

समुषद्भिरजायथाः ॥

samuṣhad'bhirajāyathā-ḥa || [KYV TS 7-4-20-11]

*& [RV S 1-6-3 // SYM 29-37 // SYK 31-12 // SV 1470 // AV 20-26-6, 20-47-12, 20-69-11*

ब्रम्हा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणाङ्ं स्वधितिर्वनानाङ्ं सोमः पवित्रमत्येति रेभन् ।

bram'hā dēvānāām' padavī[hk]'
kavīnāmṛṣhir'vip'rāṇām' mahiṣhō mṛgāṇāām |
śhyēnō gṛdh'rānāges' svadhitir'vanānāgm' sōma[fp]'
pavit'ramat'yēti rēbhan'ne |

[KYV TS 3-4-11-4 / / KYV TA 10-12-1]
*& [RV S 9-96-6 // SV 944 // Nigh 14-13]*

सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।

sachit'ra chit'rañ' chitayan'n'tamas'mē chit'rakṣhat'ra
chit'ratamaṁ' vayōdhām |



www.vedavishwa.com
www.saiveda.net

च॒न्द्रं र॒यिं पु॒रु॒वीर॑म्बृ॒हन्तं॒ चन्द्र॑चन्द्राभि॑र्गृण॒ते यु॑वस्व ॥

chan'dram' rayim' puruvīram'm' bṛhan'tañ'

chan'dra chan'drābhir'gṛṇatē yuvas'va ॥ [RV S 6-6-7]

ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यः केतु॑भ्यो॒ नम॑: ॥९॥

ॐ adhidēvatāp' prat'yadhidēvatā

sahitēbh'ya[hk]' kētubh'yō namaḥa ॥ 9 ॥

*********

॥ ॐ आदित्यादि नवग्रह देव॑ताभ्यो॒ नमो॒ नम॑: ॥

॥ ॐ ādit'yādi navag'raha dēvatābh'yō namō namaḥa ॥

ॐ शान्ति॒: शान्ति॒: शान्ति॑: ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Svasti Sūktam

[(1) RV S 5-51-11 to 15 – Kāñchī Pāṭhaḥa
(2) RV Khilam (Pariśhiṣhṭam)]

ॐ स्व॒स्ति नो॑ मिमीताम॒श्विना॒ भग॑: स्व॒स्ति दे॒व्यदि॑तिरन॒र्वण॑: ।

स्व॒स्ति पू॒षा , असु॑रो दधातु नः स्व॒स्ति द्यावा॑पृथि॒वी सु॑चे॒तुना॑ ॥११॥

ॐ svas'ti nōō mimītāmaśh'vinā bhagas'

svas'ti dēv'yadi-tiranar'vaṇa-ḥa ।

svas'ti pūṣhā , asu-rō dadhātu nas'

svas'tid' dyāvāāpṛthivī su-chētunāā ॥ 11 ॥

स्व॒स्तये॑ वा॒युमुप॑ ब्रवामहै॒ सोमं॑ स्व॒स्ति भुव॑नस्य॒ यस्पति॑: ।

svas'tayēē vāyumupab' bravāmahai sōmam'm'

svas'ti bhuva-nas'ya yas'pati-ḥi ।

बृहस्पतिं सर्वगणं स्वस्तयें स्वस्तयें , आदित्यासों भवन्तु नः ॥१२॥

bṛhas'patiṁ' sar'va-gaṇaṁ' svas'tayēēs'

svas'taya- , ādit'yāsōō bhavan'tu naḥa ॥ 12 ॥

विश्वें देवा नों , अद्या स्वस्तयें वैश्वानरो वसुरग्निः स्वस्तयें ।

देवा , अवन्त्वृभवः स्वस्तयें स्वस्ति नों रुद्रः पात्वंहसः ॥१३॥

viśh'vēē dēvā nōō , ad'yās' svas'tayēē

vaiśh'vānarō vasu-rag'nis' svas'tayēē ।

dēvā , a-vant'vṛbhavas' svas'tayēēs'

svas'ti nōō rud'ra[fp] pāt'vaṁ'ha-saḥa ॥ 13 ॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।

svas'ti mit'rāvaruṇās' svas'ti path'yē rēvati ।

स्वस्ति न , इन्द्रश्चाग्निश्च स्वस्ति नों , अदिते कृधि ॥१४॥

svas'ti na , in'draśh'chāg'niśh'chas'

svas'ti nōō , aditē kṛdhi ॥ 14 ॥

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसांविव ।

पुनर्ददताघ्नता जानता सं गमेमहि ॥१५॥

svas'ti pan'thāmanu- charēma

sūr'yāchan'dramasāāviva ।

punar'dadatāgh'na-tā jānatā saṅ' ga-mēmahi ॥ 15 ॥ (1)

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् ।

svas'tyaya-nan' tārk'ṣhyamariṣh'ṭanēmim'

mahad'bhūūtam' vāyasan' dēvatāānām ।



www.saivedanet www.vedarishwa.com

असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवा रुहेम ॥१॥

asuragh'namin'dra-sakhaṁ' samat'su-

brhad'yaśhō nāva-mivā ru-hēma ॥ 1 ॥

अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् ।

प्रयतपाणिः शरणं प्र पद्ये स्वस्ति संबाधेष्वभयं नो , अस्तु ॥२॥

aṁ'hōmucha-māṅ'gira-saṅ' gayañ'ñ' chas'

svas'tyāāt'rēyam' mana-sā cha tārk'ṣhyam'm ।

praya-tapāṇiśh' śharaṇam' pra pad'yēs' svas'ti

sam'm'bādhēṣh'vabha-yan' nō , astu ॥ 2 ॥ (2)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Prōkṣhaṇa Mantrāḥa

[(1) KYV TB 2-6-5-2&3 ; (2) TS 1-7-10-3* ; (3) TB 3-5-10-4&5 ; (4) TB 2-6-6-3&4]

ॐ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् ।

ॐ dēvas'yat' tvā savitu[fp]' prasavē ।

aśh'vinōōr'bāhubh'yāām ।

पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन ।

pūṣh'ṇō has'tāābh'yām । aśh'vinōr'bhaiṣhaj'yēna ।

तेजसे ब्रम्हवर्चसायाभिषिञ्चामि । देवस्य त्वा सवितुः प्रसवे ।

tējasēb' bram'havar'chasāyābhiṣhiñ'chāmi ।

dēvas'yat' tvā savitu[fp]' prasavē ।



www.sanskritavedavishwa.com

अ॒श्विनो॑र्बा॒हुभ्या॑म् । पू॒ष्णो हस्ता॑भ्याम् ।

aśh'vinōōr'bāhubh'yāām | pūṣh'ṇō has'tāābh'yām |

सर॑स्वत्यै॒ भैष॑ज्येन । वी॒र्या॑या॒न्नाद्या॑या॒भिषि॑ञ्चामि ।

saras'vat'yai bhaiṣhaj'yēna |

vīr'yāyān'nād'yāyābhiṣhiñ'chāmi |

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे । अ॒श्विनो॑र्बा॒हुभ्या॑म् ।

dēvas'yat' tvā savitu[fp]' prasavē |

aśh'vinōōr'bāhubh'yāām |

पू॒ष्णो हस्ता॑भ्याम् । इन्द्र॑स्येन्द्रि॒येण॑ ।

श्रि॒यै यश॑से॒ बला॑या॒भिषि॑ञ्चामि ॥ १ ॥

pūṣh'ṇō has'tāābh'yām | in'dras'yēn'driyēṇa |

śhriyai yaśhasē balāyābhiṣhiñ'chāmi || 1 || (1)

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॑ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्या॒ꣳ सर॑स्वत्यै
वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा॑ज्येना॒भिषि॑ञ्चामीन्द्र॑स्य त्वा॒
साम्रा॑ज्येना॒भिषि॑ञ्चामी॒ बृह॒स्पते॑स्त्वा॒ साम्रा॑ज्येणा॒भिषि॑ञ्चामि ॥ २ ॥

dēvas'yat' tvā savitu[fp]'
prasavēē (a)śh'vinōōr'bāhubh'yāām'
pūṣh'ṇō has'tāābh'yāgm' saras'vat'yai
vāchō yan'tur'yan'trēṇāg'nēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmīn'dras'yat' tvā
sām'rāāj'yēnābhiṣhiñ'chāmi bṛhas'patēēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmi || 2 || (2)

www.saivedavaishnava.com

आयुराशा॑स्ते । सुप्रजास्त्वमाशा॑स्ते ।

āyurāśhāās’tē | sup’rajās’tvamāśhāās’tē |

सजातवनस्यामाशा॑स्ते । उत्त॑रां देवयज्यामाशा॑स्ते ।

sajātavanas’yāmāśhāās’tē |

ut’tarān’ dēvayaj’yāmāśhāās’tē |

भूयो॑ हविष्कर॑णमाशा॑स्ते । दिव्यं धामाशा॑स्ते । विश्वं॑ प्रियमाशा॑स्ते ।

bhūyō haviṣh’karaṇamāśhāās’tē |

div’yan’ dhāmāśhāās’tē | viśh’vam’ priyamāśhāās’tē |

यद॒नेन॑ ह॒विषाऽऽशा॑स्ते । तद॑श्या॒त्तदृ॑घ्यात् ।

तद॑स्मै दे॒वा रा॑सन्ताम् ॥ ३ ॥

yadanēna haviṣhā (ā)śhāās’tē | tadaśh’yāt’tadṛd’dhyā-te |

tadas’mai dēvā rāsan’tām || 3 || (3)

द्रु॒प॒दादि॒वेन्मु॑मुचा॒नः । स्वि॒न्नः स्ना॒त्वी मला॑दिव ।

drupadādivēn’mumuchānaḥa |

svin’nas’ snāt’vī malādiva |

पू॒तं प॒वित्रे॑णे॒वाऽऽज्यम् । आप॑ः शुन्धन्तु॒ मैन॑सः ॥४॥

pūtam’ pavit’rēṇēvā (ā)j’yam’m |

āpaśh’ śhun’dhan’tu mainasaḥa || 4 || (4)

भूर्भुव॒स्सुवो॒ भूर्भुव॒स्सुवो॒ भूर्भुव॒स्सुव॑ः ।

bhūr’bhuvas’suvō bhūr’bhuvas’suvō

bhūr’bhuvas’suvaḥa |

ॐ शान्तिः॒ शान्तिः॒ शान्ति॑ः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ||



www.sanskritdocuments... www.vedavishwa.com

[KYV TB 2-7-7-3 to 2-7-7-9]

ॐ तेजोऽसि । तत्ते प्रयच्छामि । तेजस्वदस्तु मे मुखम् ।

ॐ tējō (a)si l tat'tēp' prayat'chhāmi l

tējas'vadas'tu mē mukham'm l

तेजस्वच्छिरो , अस्तु मे । तेजस्वान्-विश्वतः प्रत्यङ् ।

tējas'vat'chhirō , as'tu mē l

tējas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe l

तेजसा संपिपृग्धि मा । ओजोऽसि । तत्ते प्रयच्छामि ॥१॥

tējasā sam'piprg'dhi mā l

ōjō (a)si l tat'tēp' prayat'chhāmi ll 1 ll

ओजस्वदस्तु मे मुखम् । ओजस्वच्छिरो , अस्तु मे ।

ōjas'vadas'tu mē mukham'm l

ōjas'vat'chhirō , as'tu mē l

ओजस्वान्-विश्वतः प्रत्यङ् । ओजसा संपिपृग्धि मा ।

ōjas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe l

ōjasā sam'piprg'dhi mā l

पयोऽसि । तत्ते प्रयच्छामि । पयस्वदस्तु मे मुखम् ।

payō (a)si l tat'tēp' prayat'chhāmi l

payas'vadas'tu mē mukham'm l

पयस्वच्छिरो , अस्तु मे । पयस्वान्-विश्वतः प्रत्यङ् ।

payas'vat'chhirō , as'tu mē l

payas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe l



www.vedavishwa.com

पयसा संपिपृग्धि मा ॥२॥

payasā sam'piprg'dhi mā ‖ 2 ‖

आयुरसि । तत्ते प्रयच्छामि । आयुष्मदस्तु मे मुखम् ।

āyurasi | tat'tēp' prayat'chhāmi |

āyuṣh'madas'tu mē mukham'm |

आयुष्मच्छिरो , अस्तु मे । आयुष्मान्-विश्वतः प्रत्यङ् ।

āyuṣh'mat'chhirō , as'tu mē |

āyuṣh'mā-neviśh'vata[fp]' prat'yaṅ'ṅe |

आयुषा संपिपृग्धि मा । इममग्न , आयुषे वर्चसे कृधि ।

āyuṣhā sam'piprg'dhi mā |

imamag'na , āyuṣhē var'chasē kṛdhi |

प्रियꣳ रेतो वरुण सोम राजन् । मातेवास्मा , अदिते शर्म यच्छ ।

विश्वे देवा जरदष्टिर्यथा सत् ॥३॥

priyagm' rētō varuṇa sōma rājan'ne |

mātēvāās'mā , aditē śhar'ma yat'chha |

viśh'vē dēvā jaradaṣh'ṭir'yathā sate ‖ 3 ‖

आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि ।

āyurasi viśh'vāyurasi | sar'vāyurasi sar'vamāyurasi |

यतो वातो मनोजवाः । यतः क्षरन्ति सिन्धवः ।

yatō vātō manōjavā-ḥa |

yataḥa , kṣharan'ti sin'dhavaḥa |

तासाँ॑ त्वा॒ सर्वा॑साꣳ रु॒चा । अ॒भिषि॑ञ्चामि॒ वर्च॑सा ।

tāsāān' tvā sar'vāsāgm' ruchā ।

abhiṣhiñ'chāmi var'chasā ।

स॒मु॒द्र , इ॑वासि ग॒म्हना॑ ।सोम॑ , इवा॒स्यदा॑भ्यः ।

samud'ra , ivāsi gam'hanāā ।

sōma , ivās'yadāābh'yaḥa ।

अ॒ग्निरि॑व वि॒श्वतः॑ प्र॒त्यङ् । सूर्य॑ , इ॒व ज्योति॑षा वि॒भूः ॥४॥

ag'niriva viśh'vata[fp]' prat'yaṅ'ṅe ।

sūr'ya , ivaj' jyōtiṣhā vibhū-ḥu ॥ 4 ॥

अ॒पां यो द्रव॑णे॒ रसः॑ । तम॒हम॒स्मा , आ॑मुष्याय॒णाय॑ ।

apāñ' yōd' dravaṇē rasaḥa ।

tamahamas'mā , āmuṣh'yāyaṇāya ।

तेज॑से ब्रम्हवर्च॒साय॑ गृण्हामि । अ॒पां य , ऊ॒र्मौ रसः॑ ।

tējasēb' bram'havar'chasāya gṛṇ'hāmi ।

apāñ' ya , ūr'mau rasaḥa ।

तम॒हम॒स्मा , आ॑मुष्याय॒णाय॑ । ओज॑से वी॒र्या॑य गृण्हामि ।

tamahamas'mā , āmuṣh'yāyaṇāya ।

ōjasē vīr'yāya gṛṇ'hāmi ।

अ॒पां यो म॑ध्य॒तो रसः॑ । तम॒हम॒स्मा , आ॑मुष्याय॒णाय॑ ।

apāñ' yō madh'yatō rasaḥa ।

tamahamas'mā , āmuṣh'yāyaṇāya ।



www.saiveda.net
www.vedavishwa.com

पुष्ट्यै॑ प्र॒जन॑नाय गृण्हामि । अ॒पां यो य॒ज्ञियो॒ रस॑ः ।

puṣh'ṭyaiīp' prajanānāya gṛṇ'hāmi I
apāñ' yō yaj'ñiyō rasaḥa I

त॒मह॒मस्मा , आ॑मुष्याय॒णाय॑ । आयु॑षे दी॒र्घायु॒त्वाय॑ गृण्हामि ॥५॥

tamahamas'mā , āmuṣh'yāyaṇāya I
āyuṣhē dīr'ghāyut'vāya gṛṇ'hāmi II 5 II

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi II

## Sūryanamaskāra mantrāḥa

[(1) RV S 1-50-11 to 13 – Kāñchī Pāṭhaḥa]

ॐ उ॒द्यन्न॒द्य मि॑त्रमह , आ॒रोह॒न्नुत्त॑रां॒ दिव॑म् ।
हृ॒द्रोगं॑ मम॑ सूर्य हरि॒माणं॑ च नाशय ॥११॥

ॐ ud'yan'nad'ya mit'ramaha ,
āarōhan'nut'ta-rān' divam'm I
hṛd'rōgam' mama- sūr'ya harimāṇañ'ñ'
cha nāśhaya II 11 II

शुके॑षु मे हरि॒माणं॑ रोप॒णाका॑सु दध्मसि ।
अथो॑ हारिद्र॒वेषु॑ मे ह॒रिमाणं॒ नि द॑ध्मसि ॥१२॥

śhukēēṣhu mē harimāṇaṁ'ṁ' rōpaṇākāāsu dadh'masi I
athōō hārid'ravēṣhu- mē harimāṇan' ni dadh'masi II 12 II

उद्गाद्यमादित्यो विश्वेन सहसा सह ।

द्विषन्तं मह्यं रन्धयन्मो , अहं द्विषते रधम् ॥ १३ ॥

udagādayamāāditʼyō viśhʼvēēna sahasā saha I

dviṣhanʼtamʼ mahʼyaṁʼṁʼ ranʼdhayanʼmō ,

ahanʼ dvi-ṣhatē ra-dham II 13 II (1)

*bījākṣharayukta sūryanamaskāra mantrāḥa*

ॐ ह्रां । उद्यन्नद्य मित्रमहः । मित्राय नमः ॥ १ ॥

ō-ṁʼ hrāṁ I udʼyanʼnadʼya mitʼramahaḥa I

mitʼrāya namaḥa II 1 II

ॐ ह्रीं । आरोहन्नुत्तरां दिवम् । रवये नमः ॥ २ ॥

ō-ṁʼ hrīṁ I ārōhanʼnutʼta-rānʼ divamʼm I

ravayē namaḥa II 2 II

ॐ ह्रूं । हृद्रोगं मम सूर्य । सूर्याय नमः ॥ ३ ॥

ō-ṁʼ hrūṁ I hṛdʼrōgamʼ mama- sūrʼya I

sūrʼyāya namaḥa II 3 II

ॐ ह्रैं । हरिमाणं च नाशय । भानवे नमः ॥ ४ ॥

ō-ṁʼ hraiṁ I harimāṇañʼñʼ cha nāśhaya I

bhānavē namaḥa II 4 II

ॐ ह्रौं । शुकेषु मे हरिमाणम् । खगाय नमः ॥ ५ ॥

ō-ṁʼ hrauṁ I śhukēēṣhu mē harimāṇamʼm I

khagāya namaḥa II 5 II

www.vedavishwa.com

ॐ ह्रः । रोपणाकासु दध्मसि । पूष्णे नमः ॥६॥

ō-ṁ’ hraḥa l rōpaṇākāāsu dadh’masi l
pūṣh’ṇē namaḥa ll 6 ll

ॐ ह्रां । अथौ हारिद्रवेषु मे । हिरण्यगर्भाय नमः ॥७॥

ō-ṁ’ hrāṁ l athōō hārid’ravēṣhu- mē l
hiraṇ’yagar’bhāya namaḥa ll 7 ll

ॐ ह्रीं । हरिमाणं नि दध्मसि । मरीचये नमः ॥८॥

ō-ṁ’ hrīṁ l harimāṇan’ ni dadh’masi l
marīchayē namaḥa ll 8 ll

ॐ ह्रूं । उदगादयमादित्यः । आदित्याय नमः ॥९॥

ō-ṁ’ hrūṁ l uda-gādayamāādit’yaḥa l
ādit’yāya namaḥa ll 9 ll

ॐ ह्रैं । विश्वेन सहसा सह । सवित्रे नमः ॥१०॥

ō-ṁ’ hraiṁ l viśh’vēēna saha-sā saha l
savit’rē namaḥa ll 10 ll

ॐ ह्रौं । द्विषन्तं मह्यं रन्धयन् । अर्काय नमः ॥११॥

ō-ṁ’ hrauṁ l
dviṣhan’tam’ mah’yaṁ’ṁ’ ran’dhayan’n’ne l
ar’kāya namaḥa ll 11 ll

ॐ ह्रः । मो , अहं द्विषते रधम् । भास्कराय नमः ॥१२॥

ō-ṁ’ hraḥa l mō , ahan’ dvi-ṣhatē ra-dham l
bhās’karāya namaḥa ll 12 ll



www.saiveda.net
www.vedavishwa.com

ॐ ह्रां , ह्रीं । उ॒द्यन्न॒द्य मि॑त्रमह , आ॒रोह॒न्नुत्त॑रां॒ दिव॑म्॒ ।
मित्र-रविभ्यां नमः ॥ १ ॥

ō-ṁ' hrāṁ , hrīṁ I
ud'yan'nad'ya mit'ramaha ,
āro̅han'nut'ta-rān' divam'm I
mit'raravibh'yān' namaḥa II 1 II

ॐ ह्रूं , ह्रैं । हृ॒द्रो॒गं मम॑ सूर्य॑ हरि॒माणं॑ च नाशय ।
सूर्य-भानुभ्यां नमः ॥ २ ॥

ō-ṁ' hrūṁ , hraiṁ I
hṛd'rōgam' mama- sūr'ya harimāṇañ'ñ' cha nāśhaya I
sūr'yabhānubh'yān' namaḥa II 2 II

ॐ ह्रौं , ह्रः । शुके॑षु मे हरि॒माणं॑ रोप॒णाका॑सु दध्मसि ।
खग-पूषभ्यां नमः ॥ ३ ॥

ō-ṁ' hrauṁ , hraḥa I
śhukēēṣhu mē harimāṇaṁ'ṁ' rōpaṇākāāsu dadh'masi I
khagapūṣhabh'yān' namaḥa II 3 II

ॐ ह्रां , ह्रीं । अथो॑ हारि॒द्रवे॑षु मे हरि॒माणं॒ नि द॑ध्मसि ।
हिरण्यगर्भ-मरीचिभ्यां नमः ॥ ४ ॥

ō-ṁ' hrāṁ , hrīṁ I
athōō hārid'ravēṣhu- mē harimāṇan' ni dadh'masi I
hiraṇ'yagar'bhamarīchibh'yān' namaḥa II 4 II

www.salveda.net www.vedavishwa.com

ॐ ह्रूं , ह्रैं । उद्गाद्यमादित्यो विश्वेन सहसा सह ।
आदित्य-सवितृभ्यां नमः ॥५॥
ō-ṁ’ hrūṁ , hraiṁ ।
uda-gādayamāādit’yō viśh’vēēna saha-sā saha ।
ādit’yasavitṛbh’yān’ namaḥa ॥ 5 ॥

